Gyanvividha, Vol.-3; Issue-2 (Apr.-June) 2026 : PP-337-345

ज्ञानविविधा

कला, मानविकी और सामाजिक विज्ञान की सहकर्मी-समीक्षित, मूल्यांकित, त्रैमासिक शोध पत्रिका

ISSN : 3048-4537(Online)
3049-2327(Print)
IIFS Impact Factor-6.125
Vol.-3; Issue-2 (Apr.-June) 2026
Page No.- 337-345
DOI :-10.71037/gyanvividha.v3i2.51
©2026 Gyanvividha
https://journal.gyanvividha.com
Author's :
**1. बलरामः**
शोधच्छात्रः, संस्कृतविभागः, हरियाणा-केन्द्रीयविश्वविद्यालयः, महेन्द्रगढम्.
**2. डॉ. देवेन्द्रसिंहराजपूतः**
सहायकाचार्यः, संस्कृतविभागः, हरियाणा-केन्द्रीयविश्वविद्यालयः, महेन्द्रगढम्.

Corresponding Author :
**बलरामः**
शोधच्छात्रः, संस्कृतविभागः, हरियाणा-केन्द्रीयविश्वविद्यालयः, महेन्द्रगढम्.

# संस्कृतवाङ्मये भारतीयज्ञानपरम्परायाः सांस्कृतिकं महत्त्वम्

**सारांशः** आदिकालतः एव मनुष्यस्य स्वभावोऽयं वर्तते यत् सः कस्याञ्चित् संस्कृतौ वासं कर्तुमिच्छति। यस्मिन् भूभागे सः निवसति, तस्य प्रत्येककणस्य तथा विविधपरिमाणानां प्रति तस्य स्वाभाविकः प्रेमानुरागश्च भवति। देशस्य प्रति आत्मीयतायाः, राष्ट्रभक्तेः तथा राष्ट्रप्रेम्णश्च या भावना वर्तते, सा अद्यत्वे सांस्कृतिकैकसूत्रता इति कथ्यते। येषां प्राकृतिकसंसाधनानां माध्यमेन तस्य जीवनमूल्याधारिताः आवश्यकताः परिपूर्यन्ते तथा यस्मिन् जनसमुदाये तस्य सांस्कृति-कैक्य-सम्बद्धाः सरोकाराः सन्ति, तेषां सर्वेषां प्रति तस्य भावनाः जन्मतः एव सम्बद्धाः भवन्ति। भारतीयसंस्कृतिः समग्रं राष्ट्रम् एकसूत्रे बध्नाति। अस्यां भारतीयभौगोलिकप्रदेशाः, ऋतवः, सभ्यताः, वेशभूषाः, भोजनप्रकाराः, वर्णवैचित्र्यम्, भाषाः इत्यादयः बहुविधवैविध्यस्य सत्त्वेऽपि एकत्वभावं प्रदर्शयन्ति। प्रस्तुतस्य शोधपत्रस्य उद्देश्यं भारतस्य वैविध्ये एकतां स्थापयन्तीनां दार्शनिक-मानवीय-सामाजिक-राजनीतिकमूल्यानां विवेचनं कृत्वा तस्य मूलसांस्कृतिकैक्यस्य विस्तृतं निरूपणं प्रस्तोतु-मस्ति। प्राचीनभारतीयजीवनशैली तथा तया समन्वितायाः चिन्तन-परम्परायाः प्रसूतं भारतस्य दर्शनं, धर्मः, अध्यात्मं च सम्पूर्णे देशे समरूपेण विकसितम्। अत एव भारतीयजीवनसम्बद्धाः संस्काराः, आश्रमव्यवस्था, पुरुषार्थाश्च समग्रे भारते समानरूपेण परिपालिताः दृश्यन्ते। भारतीयसांस्कृतिकचेतना एव स एकः तत्त्वविशेषः आसीत् येन सम्पूर्णं भारतवर्षम् एकसूत्रे ग्रथितं स्थितम्। भारतीयसभ्यता विश्वस्य प्राचीनतमासु सभ्यतासु अन्यतमा अस्ति, यस्याः प्रमुखा विशेषता सांस्कृतिकैकसूत्रता वर्तते। भौगोलिक-भाषिक-धार्मिक-सामाजिक-वैविध्यानां सत्त्वेऽपि भारतस्य सांस्कृतिकचेतना अखण्डधारारूपेण निरन्तरं प्रवहति। भारतीयज्ञानपरम्परा - यस्यां वेदाः, उपनिषदः, पुराणानि, रामायणम्, महाभारतम्, दर्शनशास्त्राणि, स्मृतयः, लोकपरम्पराश्च अन्तर्भवन्ति - भारतीयसांस्कृतिकैक्यस्य स्थापनायै पोषणाय च महत्त्वपूर्णं योगदानं दत्तवती। अस्मिन् शोधपत्रे भारतीयज्ञानपरम्परायां निहितायाः सांस्कृतिकैकसूत्रतायाः स्वरूपं, तस्याः आधारभूततत्त्वानि

तथा तस्याः सामाजिक-राष्ट्रीयमहत्त्वं विस्तरेण विवेचितम्।

**बीजशब्दाः** - एकता, परम्परा, एकसूत्रता, राष्ट्रता, संस्कृतिः, दृष्टिकोणः, संस्काराः, इत्यादयः।

**1. प्रस्तावना :**

**"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद्भारतं नाम भारती यत्र सन्ततिः।।"[1]**

समुद्रस्योत्तरे हिमालयस्य दक्षिणे च यः देशः अस्ति, तस्य नाम भारतम्। तत्र निवसन्ती सन्ततिः भारती इति कथ्यते। भारतीयसंस्कृतेः इतिहासे सिन्धुनद्याः अविस्मरणीया भूमिका वर्तते। पूर्वं सप्तसिन्धवः, ततः 'सिन्धुस्थानम्', अधुना 'हिन्दुस्थानम्' इत्येषु सर्वेषु 'सिन्धु' नाम्नः केन्द्रस्थानीया भूमिका दृश्यते। अतः भारतीयसंस्कृतिः विशुद्धभू-सांस्कृतिक-अवधारणायाः परिचायिका अस्ति। राष्ट्रियतायाः मूलाधारः सर्वदा संस्कृतिः एव अभवत्। एवं प्रत्येकः भारतीयनागरिकः सांस्कृतिकदृष्ट्या 'हिन्दुः' इति परिगण्यते। संस्कृतेः यथार्थार्थस्य सम्यगवगमनार्थं तस्याः 'सभ्यता' इत्यनेन सह भेदज्ञानम् अपेक्षितम्। विद्वद्भिः सभ्यतायाः विविधाः अवधारणाः प्रतिपादिताः सन्ति। एवं मन्यते यत् यदा लेखनस्य धातूनां च आविष्कारः अभवत् तदा सभ्यतायाः आरम्भः जातः। इतिहासस्य आरम्भः लेखनेन सह अभवत्, अतः सभ्यतायाः अपि आरम्भः तथैव अभवत्। सभ्यता संस्कृतेः समानार्थिनी मन्यते तथा च अस्य शब्दस्य प्रयोगः शिक्षितजनानां विषये क्रियते। सांस्कृतिकपर्व भवतु अथवा लोकपर्व, मेला-व्रत-उत्सव-त्योहारादिषु सर्वत्र संस्कृतेः संस्काराः प्रतिबिम्बन्ति। एते पर्वोत्सवाः देशविदेशयोः संस्कृतेः प्रतीकाः भवन्ति, यतः एतेषां माध्यमेन तत्तद्देशस्य संस्कृतेः वैशिष्ट्यानि, आचार-विचाराः, जीवनपद्धतिः, सामाजिकसम्बन्धानां गरिमा, प्रकृतिपर्यावरणयोः प्रति श्रद्धा संवेदनशीलता च प्रकाशन्ते। भारतीयानां कृते पर्वोत्सवाः जीवने नूतनं हर्षोल्लासम् आनयन्ति तथा च तान् सत्पथे गन्तुं प्रेरयन्ति। भारतम् एकः बहुधार्मिकः बहुभाषिकश्च देशः अस्ति, यत्र विभिन्नधर्मावलम्बिनः जनाः निवसन्ति तथा सौहार्दपूर्णं वातावरणं निर्मातुं प्रयतन्ते। सर्वेषां धर्माणां स्वकीयाः रीतिरिवाजाः, संस्काराः, उत्सवाश्च सन्ति, ये सर्वैः जनैः सहर्षं समुत्साहेन च आचर्यन्ते। एते पर्वोत्सवाः समाजस्य जीवन्ततां वर्धयन्ति तथा च विविधतायाम् एकतायाः भावम् उत्पद्यन्ते। परिवारेषु सामाजिकसंस्थासु च एते उत्सवाः महोत्साहेन आयोज्यन्ते। एतेषां पालनस्य उद्देश्यः अयं यत् जनाः पर्वोत्सवानां माध्यमेन अस्माकं सभ्यतां संस्कृतिं च ज्ञात्वा राष्ट्रस्य भावात्मकां राष्ट्रियैक्यं च दृढीकर्तुं स्वस्य सकारात्मकभूमिकां निर्वहेयुः। हिन्दुधर्मे पर्वणां धार्मिकोत्सवानां च बहुलता दृश्यते, येन जनसामान्येषु 'सप्तवारं नवोत्सवाः' इति लोकोक्तिः प्रसिद्धा जाता। यदि सम्यक् अनुसन्धानं विचारं च क्रियते तर्हि वस्तुतः प्रत्येकः तिथिः वारश्च पर्वरूपेण परिगण्यते, तस्य पालनार्थं विशेषाः धार्मिकविधयः अपि निर्दिष्टाः सन्ति। एतेभ्यः अतिरिक्तं देवानाम्, अवताराणाम्, महापुरुषाणां स्मृत्यर्थं जयन्त्यर्थं च उत्सवाः निर्धारिताः सन्ति। केचन अन्ये पर्वाणि यथा संक्रान्तिः, ग्रहणम्, कुम्भमहोत्सवः इत्यादयः आकाशस्थितग्रहाणां योगं तेषां पृथिव्यां प्रभावं च दृष्ट्वा आचर्यन्ते। धर्मस्य अध्यात्मभावस्य च वृद्धेः सह धार्मिकसामाजिकोत्सवानां प्रमुखः उद्देश्यः सामूहिकतायाः संवर्धनमपि अस्ति। ये उत्सवाः प्राचीनमहापुरुषाणाम् अथवा अवताराणां जयन्तिरुपेण आचर्यन्ते, तेषां महान् लाभः अयं यत् जनाः तेषां जीवनात् सच्चरित्रता, नैतिकता, सेवा, सद्भावना इत्यादीनां शिक्षां प्राप्नुवन्ति। भारतीयसांस्कृतिकैक्यस्य प्रकटकाः अनेके उत्सवाः प्रेमबन्धुत्वयोः प्रतीकत्वेन तिष्ठन्ति। सम्पूर्णं भारतम् एतेषु उत्सवेषु एकसूत्रेण बद्धम् इव दृश्यते।

**"सौराष्ट्र सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।**
**उज्जयिन्यां महाकालओंकारे परमेश्वरम् ।।**
**केदारं हिमवत्पृष्ठे डाकिन्यां भीमशंकरम् ।**
**वाराणस्यां च विश्वेशं त्र्यम्बकं गौतमीतटे ।।**
**वैद्यनाथं चिताभूमौ नागेशं दारुकावने।**
**सेतुबन्धे च रामेशं घुश्मेशं तु शिवालये ।।**
**द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत्।**

**सप्तजन्म कृतं पापं स्मरणेन विनश्यति ।।”[2]**

समुद्रस्योत्तरे हिमालयस्य दक्षिणे च यः देशः अस्ति, तस्य नाम भारतम्। तत्र निवसन्ती सन्ततिः भारती इति कथ्यते। भारतीयसंस्कृतेः इतिहासे सिन्धुनद्याः अविस्मरणीया भूमिका वर्तते। पूर्वं सप्तसिन्धवः, ततः 'सिन्धुस्थानम्', अधुना 'हिन्दुस्थानम्' इत्येषु सर्वेषु 'सिन्धु' नाम्नः केन्द्रस्थानीया भूमिका दृश्यते। अतः भारतीयसंस्कृतिः विशुद्धभू-सांस्कृतिक-अवधारणायाः परिचायिका अस्ति। राष्ट्रियतायाः मूलाधारः सर्वदा संस्कृतिः एव अभवत्। एवं प्रत्येकः भारतीयनागरिकः सांस्कृतिकदृष्ट्या 'हिन्दुः' इति परिगण्यते। संस्कृतेः यथार्थार्थस्य सम्यगवगमनार्थं तस्याः 'सभ्यता' इत्यनेन सह भेदज्ञानम् अपेक्षितम्। विद्वद्भिः सभ्यतायाः विविधाः अवधारणाः प्रतिपादिताः सन्ति। एवं मन्यते यत् यदा लेखनस्य धातूनां च आविष्कारः अभवत् तदा सभ्यतायाः आरम्भः जातः। इतिहासस्य आरम्भः लेखनेन सह अभवत्, अतः सभ्यतायाः अपि आरम्भः तथैव अभवत्। सभ्यता संस्कृतेः समानार्थिनी मन्यते तथा च अस्य शब्दस्य प्रयोगः शिक्षितजनानां विषये क्रियते। सांस्कृतिकपर्व भवतु अथवा लोकपर्व, मेला-व्रत-उत्सव-त्योहारादिषु सर्वत्र संस्कृतेः संस्काराः प्रतिबिम्बन्ति। एते पर्वोत्सवाः देशविदेशयोः संस्कृतेः प्रतीकाः भवन्ति, यतः एतेषां माध्यमेन तत्तद्देशस्य संस्कृतेः वैशिष्ट्यानि, आचार-विचाराः, जीवनपद्धतिः, सामाजिकसम्बन्धानां गरिमा, प्रकृतिपर्यावरणयोः प्रति श्रद्धा संवेदनशीलता च प्रकाशन्ते। भारतीयानां कृते पर्वोत्सवाः जीवने नूतनं हर्षोल्लासम् आनयन्ति तथा च तान् सत्पथे गन्तुं प्रेरयन्ति। भारतम् एकः बहुधार्मिकः बहुभाषिकश्च देशः अस्ति, यत्र विभिन्नधर्मावलम्बिनः जनाः निवसन्ति तथा सौहार्दपूर्णं वातावरणं निर्मातुं प्रयतन्ते। सर्वेषां धर्माणां स्वकीयाः रीतिरिवाजाः, संस्काराः, उत्सवाश्च सन्ति, ये सर्वैः जनैः सहर्षं समुत्साहेन च आचर्यन्ते। एते पर्वोत्सवाः समाजस्य जीवन्ततां वर्धयन्ति तथा च विविधतायाम् एकतायाः भावम् उत्पद्यन्ते। परिवारेषु सामाजिकसंस्थासु च एते उत्सवाः महोत्साहेन आयोज्यन्ते। एतेषां पालनस्य उद्देश्यः अयं यत् जनाः पर्वोत्सवानां माध्यमेन अस्माकं सभ्यतां संस्कृतिं च ज्ञात्वा राष्ट्रस्य भावात्मकां राष्ट्रियैक्यं च दृढीकर्तुं स्वस्य सकारात्मकभूमिकां निर्वहेयुः। हिन्दुधर्मे पर्वणां धार्मिकोत्सवानां च बहुलता दृश्यते, येन जनसामान्येषु 'सप्तवारं नवोत्सवाः' इति लोकोक्तिः प्रसिद्धा जाता। यदि सम्यक् अनुसन्धानं विचारं च क्रियते तर्हि वस्तुतः प्रत्येकः तिथिः वारश्च पर्वरूपेण परिगण्यते, तस्य पालनार्थं विशेषाः धार्मिकविधयः अपि निर्दिष्टाः सन्ति। एतेभ्यः अतिरिक्तं देवानाम्, अवताराणाम्, महापुरुषाणां स्मृत्यर्थं जयन्त्यर्थं च उत्सवाः निर्धारिताः सन्ति। केचन अन्ये पर्वाणि यथा संक्रान्तिः, ग्रहणम्, कुम्भमहोत्सवः इत्यादयः आकाशस्थितग्रहाणां योगं तेषां पृथिव्यां प्रभावं च दृष्ट्वा आचर्यन्ते। धर्मस्य अध्यात्मभावस्य च वृद्धेः सह धार्मिकसामाजिकोत्सवानां प्रमुखः उद्देश्यः सामूहिकतायाः संवर्धनमपि अस्ति। ये उत्सवाः प्राचीनमहापुरुषाणाम् अथवा अवताराणां जयन्तिरूपेण आचर्यन्ते, तेषां महान् लाभः अयं यत् जनाः तेषां जीवनात् सच्चरित्रता, नैतिकता, सेवा, सद्भावना इत्यादीनां शिक्षां प्राप्नुवन्ति। भारतीयसांस्कृतिकैक्यस्य प्रकटकाः अनेके उत्सवाः प्रेमबन्धुत्वयोः प्रतीकत्वेन तिष्ठन्ति। सम्पूर्णं भारतम् एतेषु उत्सवेषु एकसूत्रेण बद्धम् इव दृश्यते।

**“गंगे च यमुने चैव गोदावरि सरस्वती।**
**नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु।।”[3]**

गङ्गा, यमुना, सरस्वती, गोदावरी, नर्मदा, कावेरी तथा सिन्धुः - एताः सप्त नद्यः अस्माकं राष्ट्रीयैक्यस्य प्रतीकाः सन्ति। अयं श्लोकः भारतीयधार्मिकपरम्परायां अत्यन्तं प्रसिद्धः 'सप्तनदी-स्मरणमन्त्रः' अस्ति। अस्मिन् भारतस्य सप्त पवित्रनदीनां स्मरणं कृतम् अस्ति। स्नानकाले, पूजाकाले अथवा आचमनसमये अस्य मन्त्रस्य उच्चारणं क्रियते, येन एतासां सर्वासां नदीनां पवित्रता तस्मिन् जले विद्यमाना इव मन्यते। भारतीयसंस्कृतौ नद्यः केवलं जलधाराः न मन्यन्ते, अपितु मातृरूपेण, देवीरूपेण तथा जीवनदायिनीशक्तिरूपेण च पूज्यन्ते। नद्यः भारतस्य सभ्यतायाः, कृषेः, संस्कृतेः तथा धर्मस्य आधारभूताः सन्ति। अतः अस्माकं ऋषिभिः तासां दिव्यस्वरूपं निरूप्य तासां सम्मानः शिक्षितः। मनुष्यः यत्र कुत्रापि स्नानं कुर्यात् अथवा पूजार्थं जलं गृह्णीयात्, तदा अनेन मन्त्रेण सम्पूर्णभारतस्य पवित्रनदीनां स्मरणं कुर्यात्। तेन तत् जलमपि पवित्रं मन्यते। अयं विचारः केवलं धार्मिकः नास्ति, अपितु राष्ट्रीय-सांस्कृतिकैक्यस्य अपि प्रतीकः

अस्ति। अस्मिन् मन्त्रे उत्तर, दक्षिण, पूर्व तथा पश्चिमभारतस्य नदीनां समवेतस्मरणेन सम्पूर्णं भारतवर्षम् एकसूत्रे बन्धितुं प्रयत्नः कृतः अस्ति।

**"महेन्द्रो मलयः सह्यो देवतात्मा हिमालयः।**
**ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा॥"**[4]

उड़ीसादेशस्थितः महेन्द्रपर्वतः, कर्नाटकप्रदेशस्थितः मलयपर्वतः, महाराष्ट्रप्रदेशस्थितः सह्याद्रिः, गुजरातप्रदेशस्थितः रैवतकपर्वतः तथा राजस्थानप्रदेशस्थितः अरावलीपर्वतमाला च एतेषां पर्वतानां प्राचीनग्रन्थेषु भारतभूमेः महिमानं वर्णयन्तः बहवः उल्लेखाः प्राप्यन्ते। तेषु सर्वप्रथमं हिमालयपर्वतस्य उल्लेखः कृतः अस्ति। हिमालयः 'देवतात्मा' इति कथ्यते, अर्थात् देवतुल्यपवित्रात्मा पर्वतः। अयं पर्वतः भारतस्य उत्तरदिशि स्थित्वा देशस्य प्राकृतिकसीमां निर्माति। हिमालयात् गङ्गा, यमुना, सरस्वती, ब्रह्मपुत्रादयः महानद्यः प्रवहन्ति, याभिः भारतीयसभ्यता पोषिता अस्ति। हिन्दुधर्मे हिमालयः शिवपार्वत्योः निवासस्थानत्वेन मन्यते। कैलासपर्वतः, बद्रीनाथः, केदारनाथः, अमरनाथः इत्यादीनि अनेकानि पुण्यतीर्थानि अस्य पर्वतप्रदेशस्य अन्तर्गतानि सन्ति। अतः हिमालयः केवलं पर्वतः नास्ति, अपितु भारतीयाध्यात्मिकचेतनायाः केन्द्रमस्ति। अन्ते अरावलीपर्वतमालायाः उल्लेखः कृतः अस्ति, या राजस्थानप्रदेशे स्थित्वा भारतस्य प्राचीनतमासु पर्वतमालासु अन्यतमा वर्तते। अरावलीपर्वतमालया राजस्थानस्य इतिहासः संस्कृतिश्च गम्भीररूपेण प्रभावितौ स्तः। मेवाडप्रदेशस्य वीरराजपूताः अस्मिन् पर्वतप्रदेशे स्वान् दुर्गान् निर्माय विदेश्याक्रमणानां प्रतिकारं कृतवन्तः। चित्तौड्गढः तथा कुम्भलगढः इत्यादयः ऐतिहासिकदुर्गाः अपि अस्मिन् क्षेत्रे स्थिताः सन्ति। एषा पर्वतश्रेणी भारतीयसांस्कृतिकशक्तेः प्रतीकरूपेण प्रतिष्ठिता अस्ति। भारतीयसंस्कृतौ पर्वताः केवलं भौगोलिकसंरचनाः न मन्यन्ते, अपितु ते आध्यात्मिकशक्तेः, सांस्कृतिकपरम्परायाः तथा राष्ट्रियैक्यस्य प्रतीकाः इति स्वीकृताः सन्ति।

**"अयोध्या मथुरा माया काशी काञ्चि अवन्तिका।**
**पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः।।"**[5]

अयोध्या, मथुरा, हरिद्वारः, काशी, काञ्ची, अवन्तिका (उज्जयिनी) तथा द्वारिकापुरी - एताः सप्त मोक्षपुर्यः भारतीयसांस्कृतिकैकसूत्रतां मोक्षमार्गे नयन्ति। एवं एताः सप्त मोक्षपुर्यः भारतस्य आध्यात्मिक-सांस्कृतिकैकतायाः प्रतीकानि सन्ति। एतानि नगराणि केवलं धार्मिकश्रद्धायाः केन्द्राणि न सन्ति, अपितु भारतीयसंस्कृतेः अखण्डपरम्परायाः, इतिहासस्य तथा आध्यात्मिकसाधनायाः जीवन्तप्रतीकानि अपि सन्ति। एतेषां पवित्रस्थलानां यात्रा मनुष्यं आत्मशुद्धये, आध्यात्मिकोन्नतये तथा अन्ततः मोक्षप्राप्तये प्रेरयति। भारतीयसंस्कृतौ केचन नगराः केवलं भौगोलिकस्थानरूपेण न स्वीकृताः, अपितु ते आध्यात्मिकचेतनायाः मोक्षप्राप्तेश्च पवित्रद्वाराणि इव परिगण्यन्ते।

**चत्वारः शाङ्करमठाः** "ज्योतिर्मठः (गढ़वाल-हिमालयप्रदेशे), गोवर्धनमठः (जगन्नाथपुरी), श्रृङ्गेरीमठः (कर्णाटकदेशे), शारदामठः (द्वारकायां गुजरातप्रदेशे) - एते चत्वारः मठाः भारतीयसमाजं एकतासूत्रेण बध्नन्ति। आदिशङ्कराचार्यः स्वस्य जीवनकाले द्वात्रिंशद्वर्षीयावस्थायां एतेषां चतुर्णां मठानां स्थापना कृतवान्। तेन उपनिषदां, दर्शनशास्त्राणां तथा वेदानां सम्यगध्ययनं कृत्वा उपनिषदां भगवद्गीतायाश्च भाष्यं विरचितम्। तत् अस्माकं सांस्कृतिकराष्ट्रवादस्य द्योतकं भवति तथा सम्पूर्णं राष्ट्रम् एकतासूत्रेण बद्धं धारयति।"[6]

**चत्वारि कुम्भस्थलानि:** "हरिद्वारः, प्रयागराजः, अवन्तिका (उज्जयिनी) तथा नासिकम् - एतानि चत्वारि कुम्भस्थलानि भारतीयसंस्कृतेः सांस्कृतिकसौहार्दस्य प्रतीकानि सन्ति। भारतीयधार्मिक-सांस्कृतिकपरम्परायां कुम्भपर्वणः अत्यन्तं महत्त्वपूर्णं स्थानम् अस्ति। कुम्भमेला विश्वस्य बृहत्तमः धार्मिकसमागमः मन्यते। अयं पर्व विशेषग्रह-नक्षत्रस्थित्यनुसारं द्वादशवर्षान्तरालेषु एतेषु चतुर्षु पुण्यतीर्थेषु आयोज्यते। कुम्भपर्वणः आधारः समुद्रमन्थनस्य पौराणिककथायां निहितः अस्ति। एतानि सर्वाणि कुम्भस्थलानि भारतीयसंस्कृतेः आध्यात्मिकैक्यस्य प्रतीकानि सन्ति। अस्मिन् महोत्सवे विविधाखाडेषु सम्बद्धाः साधवः, सन्तः, योगिनः, तपस्विनः तथा देश-विदेशेभ्यः आगताः लक्षशः श्रद्धालवः

सम्मिलन्ति। कुम्भः केवलं धार्मिकः समारोहः नास्ति, अपितु भारतीयसंस्कृतेः, दर्शनस्य, योगस्य, साधनायाः तथा सामाजिकसमन्वयस्य महानुत्सवः अस्ति। अत्र सन्तमहात्मनां प्रवचनानि, धार्मिकचर्चाः, दानपुण्यकर्माणि तथा सांस्कृतिककार्यक्रमाश्च आयोज्यन्ते। प्रयागराजः, हरिद्वारः, उज्जयिनी, नासिकं च भारतीयश्रद्धायाः, संस्कृतेः, परम्परायाश्च प्रमुखकेन्द्राणि सन्ति। कुम्भपर्व एतानि सर्वाणि तीर्थानि एकसूत्रे बद्ध्वा भारतस्य आध्यात्मिकपरम्परां जीवयति। एषः पर्व विश्वाय भारतीयसंस्कृतेः विशालता, सहिष्णुता तथा आध्यात्मिकचेतनायाः सन्देशं प्रददाति।"[7]

**चत्वारः धामाः** "बदरीनाथः (हिमालये), जगन्नाथपुरी (ओडिशाराज्ये), सेतुबन्धरामेश्वरम् (तमिलनाडुराज्ये) तथा द्वारका (गुजरातराज्ये) एते चत्वारः धामाः भारतीयसन्तपरम्परायै ऊर्जा प्रददति तथा भक्तेः अध्यात्मजागरणस्य च प्रमुखां भूमिकां निर्वहन्ति। भारतीयसनातनपरम्परायां चत्वारः धामाः अत्यन्तमहत्त्वपूर्णतीर्थानि मन्यन्ते। एते भारतस्य चतुर्षु दिक्षु स्थिताः सन्तः सम्पूर्णभारतं सांस्कृतिक-धार्मिक-आध्यात्मिकसूत्रेण बध्नन्ति। परम्परानुसारम् एतेषां धाम्नां प्रतिष्ठापनं महिमाप्रचारश्च महान् दार्शनिकः सन्तः आदि शङ्कराचार्यः अकरोत्। तेन भारतस्य आध्यात्मिकैक्यं दृढीकर्तुं एतेषां तीर्थानां विशेषमहत्त्वं प्रतिपादितम्। एतेषां धाम्नां यात्रां 'चारधामयात्रा' इति कथयन्ति। एषा यात्रा केवलं तीर्थाटनं नास्ति, अपितु भारतस्य सांस्कृतिकैक्यस्य, सन्तपरम्परायाः तथा आध्यात्मिकसाधनायाः प्रतीकं वर्तते। एते धामाः भारतीयश्रद्धायाः, भक्तेः, साधनायाः, त्यागस्य तथा आध्यात्मिकोन्नतेः महान् मार्गदर्शकाः सन्ति। अतः बदरीनाथः, जगन्नाथपुरी, रामेश्वरम्, द्वारका च केवलं तीर्थस्थानानि न सन्ति, अपितु भारतस्य सनातनाध्यात्मिकचेतनायाः प्रकाशस्तम्भाः अपि सन्ति।"[8]

**आश्रमव्यवस्था:** "वैदिककालीनैः चिन्तकैः मानवजीवनं चतुर्षु अवस्थासु विभक्तम् - बाल्यावस्था, किशोरावस्था, यौवनावस्था, वृद्धावस्था चेति। एषा व्यवस्था आश्रमव्यवस्था इति कथ्यते। 'आश्रम' इति शब्दः संस्कृतस्य 'श्रम्' धातोः निष्पन्नः अस्ति, यस्य अर्थः प्रयत्नः, साधना अथवा अनुशासितजीवनम् इति। अतः आश्रमव्यवस्थायाः तात्पर्यम् अस्ति यत् मानवजीवनं विविधेषु चरणेषु विभज्य प्रत्येकस्य चरणस्य कर्तव्यं तथा आदर्शः निर्धारितः भवेत्। भारतीयसंस्कृतौ एषा व्यवस्था केवलं वैयक्तिकजीवनस्य न, अपितु सामाजिक-नैतिक-आध्यात्मिकविकासस्य अपि सम्यक् समन्वयं करोति। वैदिकमनीषिभिः मानवजीवनं सामान्यतः शतवर्षात्मकं मत्वा चतुर्ष्वाश्रमेषु विभक्तम् - ब्रह्मचर्यम्, गार्हस्थ्यम्, वानप्रस्थः, संन्यासश्च।"[9]

**वर्णव्यवस्था:** "अद्य या व्यवस्था जातिव्यवस्था अथवा सामाजिकवर्गीकरणस्य सिद्धान्तरूपेण दृश्यते, सा वैदिककाले वर्णव्यवस्था इति प्रसिद्धा आसीत्। एषा व्यवस्था मुख्यतया श्रमविभाजनस्य सिद्धान्ते आधारितासीत्, यस्य उद्देश्यं समाजस्य विविधकार्याणां सुव्यवस्थितसम्पादनम् आसीत्। यथा मानवशरीरस्य विभिन्नानि अङ्गानि पृथक्-पृथक् कार्याणि कुर्वन्ति, तथैव समाजेऽपि व्यक्तिभिः विविधकर्तव्याणि सम्पादनीयानि भवन्ति। एषा सावयविकसिद्धान्ताधारितव्यवस्था वैदिककाले प्रचलिता आसीत्। वर्णव्यवस्था भारतीयसमाजस्य प्राचीनसामाजिकसंरचनायाः महत्त्वपूर्णः सिद्धान्तः अस्ति।"[10]

**षड्तवः** "वसन्तऋतुः एषा ऋतूनां राजा इति कथ्यते। फाल्गुन-चैत्रमासयोः भवति। अस्मिन् काले वातावरणं मनोहरं भवति। ग्रीष्मऋतुः वैशाख-ज्येष्ठमासयोः भवति। अस्मिन् काले तीव्रा उष्णता अनुभवते। वर्षाऋतुः आषाढ-श्रावणमासयोः भवति। अस्मिन् काले प्रचुरा वर्षा भवति तथा वृक्षलतादयः हरितिमानः भवन्ति। शरदृतुः भाद्रपद-आश्विनमासयोः भवति। अयं कालः निर्मलाकाशस्य सौन्दर्येण प्रसिद्धः अस्ति। हेमन्तऋतुः कार्तिक-मार्गशीर्षमासयोः भवति। अस्मिन् काले शीतस्य प्रभावः आरभ्यते। शिशिरऋतुः पौष-माघमासयोः भवति। अस्मिन् काले अत्यधिकशीतलता अनुभवते।"[11]

**भारतीयदर्शनपरम्परा:** "भारतीयदर्शनेषु षड्दर्शनानि आस्तिकदर्शनरूपेण प्रसिद्धानि सन्ति। सांख्यम् (कपिलः), योगः (पतञ्जलिः), न्यायः (गौतमः), वैशेषिकम् (कणादः), मीमांसा (जैमिनिः), वेदान्तः (बादरायणः) इति। नास्तिकदर्शनानि त्रीणि सन्ति। चार्वाकदर्शनम्, बौद्धदर्शनम्, जैनदर्शनम्। भारतीयदर्शनानि स्थूलात् सूक्ष्मं प्रति मार्गदर्शनं कुर्वन्ति। एतानि

धर्म-अर्थ-काम-मोक्षरूपाणां पुरुषार्थानां बोधमपि कारयन्ति। तेषु प्रतिपाद्यते यत् मनुष्यस्य जीवनं सुद्देश्ययुक्तं भवेत्, न तु उद्देश्यविहीनम्।"[12]

**भारतीयोत्सवाः** "नवरात्रम्, गणगौरव्रतम्, अक्षयतृतीया, तीजोत्सवः, रक्षाबन्धनम्, गणेशचतुर्थी, श्रीकृष्णजन्माष्टमी, विजयादशमी, करवाचतुर्थी, धनत्रयोदशी, दीपावली, गोवर्धनपूजा (अन्नकूटः), भ्रातृद्वितीया, मकरसंक्रान्तिः, वसन्तपञ्चमी, महाशिवरात्रिः, होलिकोत्सवः, बुद्धपूर्णिमा, गुरुपूर्णिमा, शरदुत्सवः, नागपञ्चमी च भारतीयसंस्कृतेः प्रमुखोत्सवाः सन्ति। भारतीयसंस्कृतौ उत्सवाः केवलं मनोरञ्जनस्य वा परम्परायाः रूपं न सन्ति, अपितु धर्मस्य, प्रकृतेः, समाजस्य तथा पारिवारिकजीवनस्य समन्वितप्रकाशनम् सन्ति। भारतवर्षे वर्षपर्यन्तं ऋतूनां परिवर्तनैः, धार्मिकविश्वासैः तथा ऐतिहासिकघटनाभिः सम्बद्धाः अनेके उत्सवाः समारभ्यन्ते। एते उत्सवाः समाजे आनन्दं, ऐक्यं, आध्यात्मिकतां तथा सांस्कृतिकनिरन्तरतां धारयन्ति। ते प्रेम, सहयोग, समरसता तथा सांस्कृतिकवैविध्यस्य भावनां वर्धयन्ति।"[13]

**शोधपत्रस्य उद्देश्यम्:** **"हिन्दवः सोदराः सर्वे न हिन्दू पतितो भवेत्।**
**मम दीक्षा हिन्दुरक्षा मम मन्त्रः समानता॥"[14]**

भारतमातुः सर्वे हिन्दवः सन्तानत्वात् सहोदराः भ्रातरश्च सन्ति। अतः कश्चिदपि भारतीयः पतितः भवितुं न शक्नोति। वयं 'समानता' इति मन्त्रं स्वीकृत्य 'धर्मरक्षणस्य' दीक्षां गृहीतवन्तः स्म। भारतदेशे निवसन् प्रत्येकः जनः हिन्दुः अस्ति, सः कस्यापि पन्थस्य, सम्प्रदायस्य वा अनुयायी भवतु। कश्चिदपि जनः नीचः, लघुः अथवा पतितः नास्ति। सर्वेऽपि भारतमातुः सन्तानाः सन्ति। सामाजिकसमरसतायाः अर्थः अस्ति - समाजस्य सर्वेषां वर्गाणां, जातीनां, पन्थानां सम्प्रदायानां च मध्ये परस्परं सम्मानस्य, समानतायाः भ्रातृत्वभावस्य च विद्यमानता। यदा समाजस्य सर्वे जनाः स्वात्मानं एकस्य परिवारस्य अङ्गं मन्यन्ते तथा च परस्परस्य सुखदुःखयोः सहभागिनः भवन्ति, तदा वास्तविकसमरसता स्थाप्यते। भारतीयसंस्कृतौ अयं विचारः अतीव प्राचीनः अस्ति। 'वसुधैव कुटुम्बकम्' इति भावनानुसारं सम्पूर्णा पृथिवी एव एकं कुटुम्बम् अस्ति। तथैव ऋग्वेदेऽपि उक्तम् अस्ति यत् मनुष्याः परस्परं मिलित्वा, एकमताः भूत्वा, एकेन उद्देशेन सह कार्यं कुर्युः। भारतीयसंस्कृतेः मूलाधारः एकात्मता समता च अस्ति। उपनिषत्सु उक्तम् अस्ति यत् प्रत्येकस्मिन् जीवेमध्ये एक एव परमात्मा वसति। यदा सर्वेषु एकैव चेतना विद्यमाना अस्ति, तर्हि ऊँचनीचभेदस्य कल्पना अज्ञानस्य परिणामः भवति। भारतीयपरम्परायां महापुरुषैः सन्तैश्च अपि अस्य विचारस्य समर्थनं कृतम्। सन्तकबीरः, सन्तरविदासः, गुरुनानकः, स्वामीविवेकानन्दः च सर्वे समाजे समतायाः भ्रातृत्वस्य च सन्देशं प्रसारितवन्तः। तेषां मते मनुष्यस्य मूल्यं तस्य जात्या जन्मना वा न, अपितु तस्य चरित्रेण, कर्मणा, गुणैश्च निर्धारितं भवति। इतिहासस्य विभिन्नेषु कालेषु सामाजिककारणैः समाजे केचन वर्गीयजातीयभेदभावाः उत्पन्नाः अभवन्। तेन समाजस्य एकता दुर्बला अभवत्। अतः समये समये महापुरुषैः समाजः स्मारितः यत् सर्वे मनुष्याः एकस्य राष्ट्रस्य संस्कृतेश्च अङ्गानि सन्ति। समरसः समाजः राष्ट्रस्य एकतायाः, शक्तेः प्रगतेश्च आधारः भवति। यदा समाजे परस्परभेदभावः समाप्तो भवति तथा च सर्वेभ्यः समानावकाशाः प्रदीयन्ते, तदा समाजस्य प्रत्येकः जनः राष्ट्रनिर्माणे योगदानं ददाति।

**"अव्वल अल्ला नूर उपाइया कुदरत दे सब बंदे।**
**एक नूर से सब जग उपज्या कौन भले को मंदे॥"[15]**

एकस्य परमपितुः अकालपुरुषस्य सन्ततिषु उच्चनीचभावः कथं सम्भवति? स्ववाण्या समाजे समरसतायाः एकात्मतायाश्च उपदेशं प्रदाय, पीरी-मीरी-परम्परायाः महान् प्रवर्तकः आद्यः सिखगुरुः श्रीगुरुनानकदेवः साधुवादार्हः अस्ति। तेन भारतीयचिन्तने सांस्कृतिकसूत्रतायाः संरक्षणस्य महान् कार्यं सम्पन्नम्। भारतीयज्ञानपरम्परायां अस्यां पुण्यभूमौ अनेके महान्तः चिन्तकाः महापुरुषाश्च प्रादुर्भूताः, येषां प्रयासैः भारतीयसांस्कृतिकैकता निरन्तरं संरक्षिता। तेषामनेकानि दृष्टान्तानि अस्मिन् शोधपत्रे प्रदर्शितानि सन्ति।

**"ॐ असतो मा सद्गमय ।**
**तमसो मा ज्योतिर्गमय ।**

**मृत्योर्माऽमृतं गमय ॥"[16]**

**"सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः ।**

**सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःखभागू भवेत् ।।"[17]**

हे ईश्वर! अस्मान् दुरितात् सद्गतिं नय, तमसः प्रकाशं नय, मृत्योः अमृतत्वं नय। सर्वे जनाः सुखिनः सन्तु, सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत्। एते वैदिकोपनिषदः मन्त्राः भारतीयसंस्कृतेः मूलजीवनमूल्यानां सत्यस्य, ज्ञानस्य, अमृतत्वस्य, शान्तेः तथा सार्वभौमिककल्याणस्य - अत्यन्तं गम्भीरं दार्शनिकसन्देशं प्रददति। एषां प्रयोगः प्रार्थनायाम्, उपासनायाम् तथा वैदिकानुष्ठानेषु व्यापकतया क्रियते। संगठनमन्त्रः भारतीयसंस्कृतेः सर्वजनहिताय सर्वजनसुखाय इति भावनायाः प्रतीकः अस्ति। अस्मिन् मन्त्रे केवलं मनुष्याणामेव न, अपितु सम्पूर्णस्य सृष्टेः कल्याणकामना कृता अस्ति। अनयोः मन्त्रयोः भारतीयसंस्कृतेः गहनः दार्शनिकः नैतिकश्च दृष्टिकोणः प्रकटितः भवति। प्रथमः मन्त्रः मनुष्यं सत्यज्ञानमोक्षमार्गे प्रवर्तितुं प्रेरयति, द्वितीयः तु सम्पूर्णविश्वस्य सुखस्य, स्वास्थ्यस्य, शान्तेश्च कामनां करोति। एवं एते मन्त्राः केवलं धार्मिकप्रार्थनाः न सन्ति, अपितु मानवतायै सार्वभौमिकान् आदर्शान् प्रस्तुतयन्ति। एतदेव कारणम् अस्ति यत् भारतीयसंस्कृतौ एभ्यः अत्यन्तमहत्त्वपूर्णं स्थानं प्राप्तम् अस्ति। अद्यापि विद्यालयेषु, धार्मिकानुष्ठानेषु तथा सामाजिककार्यक्रमेषु एषां पाठः श्रद्धया क्रियते।

**"ॐ सं गच्छध्वं सं वद्ध्वं सं वो मनांसि जानताम् ।**

**देवा भागं यथा पूर्वे सञ्जानाना उपासते ।।1।।**

**समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम् ।**

**समानं मन्त्रभिमन्त्रये वः समानेन वो हविषा जुहोमि । ।2 ।।**

**समानी व आकृतिः समाना हृदयानि वः ।**

**समानमस्तु वो मनो यथा वः सुसहासति ।। 3 ।।"[18]**

पदे पदं संयोज्य गच्छत, स्वरं स्वरैः सह संयोज्य वदत। युष्माकं मनसि समानो बोधः भवतु। यथा प्राचीनकाले देवाः समन्वितबुद्ध्या स्वस्वभागं प्राप्तवन्तः, तथैव समनस्काः जनाः स्वस्वाभीष्टानि साधयन्ति। एतेषां मन्त्रः समानः भवति, अर्थात् ते परस्परं मन्त्रयित्वा निर्णयं कुर्वन्ति। तेषां सभा एका भवति, चित्तं मनश्च समानं भवति। अहं (वेदः) युष्मान् समवेत्य समाननिष्कर्षप्राप्तये प्रेरयामि, समानं भोज्यं च प्रददामि। युष्माकं संकल्पाः समानाः सन्तु, हृदयानि समानानि सन्तु, मनांसि समानानि सन्तु, येन यूयं परस्परसहकारेण कार्यं कर्तुं समर्थाः भवेत। अस्माकं भारतीयसंस्कृतिः एकत्वस्य सन्देशं ददाति, या समग्रविश्वस्य कल्याणम् इच्छति। सा सर्वेषां प्राणिनां सुखमभिलषति। अस्य देशस्य प्रत्येकः जनः भारतीयः अस्ति, तस्य धार्मिकविश्वासः यः कश्चन भवतु। भारतीयसंस्कृतौ कश्चन एकः पैगम्बरः अथवा गुरुः सर्वोपरी न मन्यते, अपितु सा पूर्णतया सत्यान्वेषिणी वर्तते। अतः यत्र कुत्रापि ज्ञानप्राप्तिः भवति, तत् सा आद्रियते, स्वीकुर्वते च। यत्र यत्र विभूतिः, श्रीः, ऐश्वर्यं वा दृश्यते, तत्र तत्र ईश्वरतेजसः अंशः एव दृश्यते इति सा मन्यते। अस्माकं संस्कृतेः मूलतत्त्वम् एतदेव यत् वयं स्वेषु सार्वजनिकेषु निजीकार्येषु च नैतिकतायाः सर्वोच्चं स्थानं दद्मः। स्वराज्यम् अस्माकं संस्कृतेः उद्भवं संरक्षणं च करोति। तत् नूतनविचारान् स्वीकर्तुम् इच्छति, किन्तु ते सर्वे भारतीयसंस्कृतेः आधारे एव लिखितव्याः सन्ति। भारतीयसंस्कृतौ वयं बहूनि वैज्ञानिकाधारितानि कर्माणि कुर्मः। प्रातःकाले देवालयगमनम्, गोमातरं रोटिकां दातुम्, तुलसीवृक्षस्य रोपणं पूजनं च शुभं मन्यते। नारिकेलः, कदली, पीपलवृक्षः तथा अन्ये वृक्षाः, जीवजन्तवः, पर्वताः, नद्यश्च कल्पवृक्षतुल्याः मन्यन्ते, तेषां पूजनं च क्रियते। अस्माकं ऋषयः विद्वांसश्च वदन्ति - यावत् अस्माकं पारिवारिकव्यवस्था दृढा, संस्कारप्रदा च अस्ति, यावत् परिवाराः स्वबालकेभ्यः धर्मस्य, संस्कृतेः, राष्ट्ररक्षायाश्च शिक्षां ददति, तावत् विश्वस्य कापि शक्तिः अस्माकं समाजं दुर्बलं कर्तुं न शक्नोति। सुदृढपारिवारिकव्यवस्थायाः बलेन वयं सर्वाः चुनौतयः अतिक्रम्य स्वसंस्कृतेः रक्षणं करिष्यामः।

**निष्कर्षः** **"ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥"**[19]

भारतीयज्ञानपरम्परायां सांस्कृतिकमहत्त्वं केवलं सैद्धान्तिकसंकल्पना नास्ति, अपितु भारतीयजीवनदर्शनस्य मूलात्मा अस्ति। वेदाः, उपनिषदः, भगवद्गीता, रामायणम्, महाभारतम्, स्मृतिग्रन्थाः तथा लोकपरम्पराः इत्यादयः सर्वेऽपि तादृशीम् अन्तर्धारां वहन्ति, या विविधतासु एकतां स्थापयति। 'एकं सद्विप्रा बहुधा वदन्ति' तथा 'वसुधैव कुटुम्बकम्' इत्यादीनि सूत्राणि भारतीयसांस्कृतिकचेतनायाः आधारस्तम्भत्वेन प्रतिष्ठितानि सन्ति, यैः समाजः समन्वयस्य, सहअस्तित्वस्य तथा सहिष्णुतायाः मार्गे प्रेरितः। भारतीयज्ञानपरम्परायाः वैशिष्ट्यमिदम् अस्ति यत् सा भौगोलिक-भाषिक-धार्मिक-सामाजिकविविधताः विरोधरूपेण न स्वीकरोति, अपितु समृद्धेः स्वरूपेण परिगृह्णाति। अनेनैव कारणेन भारते शैव-वैष्णव-बौद्ध-जैन-सिखादयः अनेकाश्च परम्पराः एकस्मिन् सांस्कृतिकाधारे सम्यग्विकसिताः। एषा समन्वयी दृष्टिः भारतीयसमाजाय आन्तरिकदृढतां प्रदत्ता तथा राष्ट्रियैक्यभावनां सुदृढीकृतवती। अद्यतनस्य वैश्वीकरणस्य सांस्कृतिकसंक्रमणस्य च युगे भारतीयज्ञानपरम्परायाः एषा एकसूत्रता अधिकं प्रासङ्गिकत्वं धारयति। एषा न केवलं राष्ट्रियैकात्मतायाः आधारः, अपितु विश्वशान्तेः मानवकल्याणस्य च दिशि मार्गदर्शिका अपि भवितुमर्हति। अतः आवश्यकं यत् भारतीयज्ञानपरम्परायाः धर्म-कर्तव्य-समन्वय-सहअस्तित्व-लोकमङ्गलादिमूल्यानि पुनः सम्यक् अवगम्यन्ताम् तथा समकालीनपरिप्रेक्ष्ये सृजनात्मकतया आत्मसात् क्रियन्ताम्।

एवं स्पष्टं भवति यत् भारतीयज्ञानपरम्परा सांस्कृतिकैकसूत्रतायाः सशक्ता वाहिका आसीत्, या अतीतात् वर्तमानपर्यन्तं भारतीयसमाजं एकसूत्रेण ग्रथित्वा तस्य अखण्डतां निरन्तरतां च संरक्षितवती। संस्कृतवाङ्मयम् अपि एतां पुरातनां संस्कृतिं स्वलेखनमाध्यमेन निरन्तरं प्रवाहयति, यतः लिखितसाहित्यं सदैव आगामिपीढीं स्वपरम्परायाः मार्गेण परिचाययति। संस्कृतसाहित्यं अस्याः परम्परायाः संवर्धने अग्रणीं भूमिकां निर्वहति। अतः वयं वक्तुं शक्नुमः यत् भारतीयज्ञानपरम्परायां संस्कृतवाङ्मयस्य महत्त्वं तादृशमेव अस्ति यथा समाजस्य संस्कृतेश्च परस्परं महत्त्वम् अस्ति।

**संदर्भ सूची :**

1. विष्णु पुराण 2.3.1
2. शिव पुराण, खण्ड उत्तरार्ध; श्लोक 1-4; पृ. 248 - 249.
3. नारदीयपुराण, अध्याय- 27, श्लोक- 33
4. एकात्मता स्तोत्र, श्लोक संख्या- 4
5. गरुड़-पुराण, अध्याय -16; पृष्ठ सं-145.
6. भारतीय दर्शन, अद्वैत वेदान्त, पृष्ठ सं.357-365
7. भागवत महापुराण,अष्टम स्कन्ध,अध्याय-8, पृष्ठ सं. 512-515
8. भारत के प्रमुख तीर्थ, अध्याय-चार-धाम, पृष्ठ 41-48
9. मनुस्मृति,अध्याय 6, पृष्ठ सं.203-205
10. मनुस्मृति,अध्याय 1, पृष्ठ सं.34-36
11. ऋतुसंहार, सर्ग 1-6, पृष्ठ सं 1-72
12. भारतीय दर्शन, पृष्ठ सं 90-110
13. भारतीय संस्कृति का स्वरूप, पृ. 135 -150.
14. ठेंगड़ी दत्तोपंत, सामाजिक समरसता, पृष्ठ 45 -50
15. कबीर संत; श्री गुरु ग्रंथ साहिब जी; राग प्रभाती;) प्रथम पंक्ति; पद अवल अलह नूर उपाया, (अंग) पृष्ठ-1349.
16. बृहदारण्यक उपनिषद्, 1.3.28, पृ.153-154.
17. महाऔपनिषद्, अध्याय 6, श्लोक 71-73, पृ. 412.
18. ऋग्वेद संहिता, मण्डल-10; सूक्त- 191, पृष्ठ- 1540-1542.

19. ईशावास्योपनिषद्, **शान्तिपाठ (मङ्गलाचरण)** पृष्ठ- 31

## संदर्भ ग्रन्थसूची:


1. विल्सन्, एच्. एच्.; श्रीधरस्वामिटीकासहितं विष्णुपुराणम्; गीताप्रेस-प्रकाशनम्, गोरक्षपुरम्; द्वितीयोऽंशः, तृतीयोऽध्यायः, प्रथमः श्लोकः; 2019 संवत्सरस्य संस्करणम्; पृष्ठसङ्ख्या 72–73।
2. वेदव्यासः; शिवपुराणम्, कोटिरुद्रसंहिता; गीताप्रेस-प्रकाशनम्, गोरक्षपुरम्; अध्यायः 35; द्वितीयं संस्करणम्; उत्तरार्धखण्डः; श्लोकाः 1–4; पृष्ठसङ्ख्या 248–249।
3. (सं.) शर्मा, आचार्यः पण्डितः श्रीरामः; नारदीयपुराणम्, पूर्वभागः; संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; अध्यायः 27; श्लोकः 33; 2003 संवत्सरस्य संस्करणम्; पृष्ठसङ्ख्या 129–130।
4. (सं.) संस्कारभारती; एकात्मतास्तोत्रम्; सुरुचि-प्रकाशनम्, नवीनदिल्ली; श्लोकसङ्ख्या 4; 2016 संवत्सरस्य संस्करणम्; पृष्ठसङ्ख्या 4।
5. (सं.) शर्मा, आचार्यः पण्डितः श्रीरामः; गरुडपुराणम्; चौखम्बा संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; अध्यायः 16; श्लोकः 14; पृष्ठसङ्ख्या 145।
6. उपाध्यायः पण्डितः बलदेवः; भारतीयदर्शनम्; चौखम्बा विद्याभवन-प्रकाशनम्, वाराणसी; 2012 संवत्सरस्य संस्करणम्; अद्वैतवेदान्ताध्यायः; पृष्ठसङ्ख्या 357–365।
7. व्यासः महर्षिः; भागवतमहापुराणम्; गीताप्रेस-प्रकाशनम्, गोरक्षपुरम्; 2016 संवत्सरस्य नवीनसंस्करणम्; अष्टमः स्कन्धः; अध्यायः 8; श्लोकाः 1–10; पृष्ठसङ्ख्या 512–515।
8. शर्मा, आचार्यः श्रीरामः; भारतस्य प्रमुखतीर्थानि; संस्कृतिसंस्थान-प्रकाशनम्, बरेली; चतुर्धामाध्यायः; 2012 संवत्सरस्य संस्करणम्; पृष्ठसङ्ख्या 41–48।
9. (सं.) शास्त्री पण्डितः हरगोविन्दः; मनुस्मृतिः; चौखम्बा संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; प्रथमं संस्करणम्, 2018; अध्यायः 6; श्लोकाः 1–3; पृष्ठसङ्ख्या 203–205।
10. (सं.) शास्त्री पण्डितः हरगोविन्दः; मनुस्मृतिः; चौखम्बा संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; 2016 संवत्सरस्य संस्करणम्; अध्यायः 1; श्लोकाः 87–91; पृष्ठसङ्ख्या 34–36।
11. कालिदासः; ऋतुसंहारः; संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; सर्गाः 1–6; 2018 संवत्सरस्य संस्करणम्; पृष्ठसङ्ख्या 1–72।
12. उपाध्यायः बलदेवः; भारतीयदर्शनम्; चौखम्बा विद्याभवन-प्रकाशनम्, वाराणसी; 2015 संवत्सरस्य संस्करणम्; पृष्ठसङ्ख्या 90–210।
13. उपाध्यायः बलदेवः; भारतीयसंस्कृतेः स्वरूपम्; चौखम्बा विद्याभवन-प्रकाशनम्, वाराणसी; 2012; पृष्ठसङ्ख्या 135–150।
14. ठेङ्गडी दत्तोपन्तः; सामाजिकसमरसता; सुरुचि-प्रकाशनम्, नवीनदिल्ली; द्वितीयं संस्करणम्; पृष्ठसङ्ख्या 45–50।
15. सन्तकबीरः; श्रीगुरुग्रन्थसाहिबः; प्रभातीरागः; प्रथमपङ्क्तिः—"अवल अलह नूर उपाया"; अङ्कः (अङ्गः) 1349।
16. (सं.) शर्मा, आचार्यः श्रीरामः; बृहदारण्यकोपनिषद्; चौखम्बा संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; 2018 संवत्सरस्य संस्करणम्; अध्यायः 1.3.28; पृष्ठसङ्ख्या 153–154।
17. महोपनिषद्; उपनिषद्संग्रहः; चौखम्बा संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; अध्यायः 6; श्लोकाः 71–73; पृष्ठसङ्ख्या 412।
18. (सं.) सायणभाष्यसहितम्; ऋग्वेदसंहिता; चौखम्बा संस्कृतसंस्थान-प्रकाशनम्, वाराणसी; 2014 संवत्सरस्य संस्करणम्; मण्डलम् 10; सूक्तम् 191; पृष्ठसङ्ख्या 1540–1542।
19. भाष्यकारः आदि शङ्कराचार्यः; ईशावास्योपनिषद्; चौखम्बा संस्कृत सीरीज़ ऑफिस-प्रकाशनम्, वाराणसी; 2012 संवत्सरस्य संस्करणम्; पृष्ठसङ्ख्या 31।


•